# nRisiMhasahasranAmastotram

# લક્ષ્મીનૃસિંહસહસ્રનામસ્તોત્રમ્

## Document Information

Text title : nRisiMhasahasranAmastotram

File name : nRisiMhasahasranAmastotra.itx

Category : sahasranAma, vishhnu, dashAvatAra, stotra, vishnu

Location : doc_vishhnu

Proofread by : Sunder Hattangadi

Description-comments : Stotra Ratnakara Vol1 1927, PDF page 429, print page 418 with little variation. Last portion from Nrisimhakosha Vol 2

Latest update : February 5, 2025

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 5, 2025

*sanskritdocuments.org*

# લક્ષ્મીનૃસિંહસહસ્રનામસ્તોત્રમ્

દિવ્યલક્ષ્મીનૃસિંહસહસ્રનામસ્તોત્રમ્

॥ સ્તોત્રસ્ય પૂર્વપીઠિકા ॥

ૐ માર્કણ્ડેય ઉવાચ -
એવં યુદ્ધમભૂદ્ઘોરં રૌદ્રં દૈત્યબલૈઃ સહ ।
નૃસિંહસ્યાઙ્ગસમ્ભૂતૈર્નારસિંહૈરનેકશઃ ॥ ૧॥

દૈત્યકોટિહતાસ્તત્ર કેચિદ્ભીતાઃ પલાયિતાઃ ।
તં દૃષ્ટ્વાતીવ સઙ્ક્રુદ્ધો હિરણ્યકશિપુઃ સ્વયમ્ ॥ ૨॥

ભૂતપૂર્વૈરમૃત્યુર્મે ઇતિ બ્રહ્મવરોદ્ધતઃ ।
વવર્ષ શરવર્ષેણ નારસિંહો ભૃશં બલી ॥ ૩॥

દ્વન્દ્વયુદ્ધમભૂદુગ્રં દિવ્યવર્ષસહસ્રકમ્ ।
દૈત્યેન્દ્રસાહસં દૃષ્ટ્વા દેવાશ્ચેન્દ્રપુરોગમાઃ ॥ ૪॥

શ્રેયઃ કસ્ય ભવેદત્ર ઇતિ ચિન્તાપરાભવન્ ।
તદા ક્રુદ્ધો નૃસિંહસ્તુ દૈત્યેન્દ્રપ્રહિતાન્યપિ ॥ ૫॥

વિષ્ણુચક્રં મહાચક્રં કાલચક્રં તુ વૈષ્ણવમ્ ।
રૌદ્રં પાશુપતં બ્રાહ્મં કૌબેરં કુલિશાસનમ્ ॥ ૬॥

આગ્નેયં વારુણં સૌમ્યં મોહનં સૌરપાર્વતમ્ ।
ભાર્ગવાદિબહૂન્યસ્ત્રાણ્યભક્ષયત કોપનઃ ॥ ૭॥

સન્ધ્યાકાલે સભાદ્વારે સ્વાઙ્કે નિક્ષિપ્યભૈરવઃ ।
તતઃ ખટ્ગધરં દૈત્યં જગ્રાહ નરકેસરી ॥ ૮॥

હિરણ્યકશિપોર્વક્ષો વિદાર્યાતીવ રોષિતઃ ।
ઉદ્ધૃત્ય ચાન્ત્રમાલાનિ નખૈર્વજ્રસમપ્રભૈઃ ॥ ૯॥

મેને કૃતાર્થમાત્માનં સર્વતઃ પર્યવૈક્ષત ।

હર્ષિતા દેવતાઃ સર્વાઃ પુષ્પવૃષ્ટિમવાકિરન્ ॥ ૧૦॥

દેવદુન્દુભયો નેદુર્વિમલાશ્ચ દિશોઽભવન્ ।
નરસિંહ મતીવોગ્રં વિકીર્ણવદનં ભૃશમ્ ॥ ૧૧॥

લેલિહાનં ચ ગર્જન્તં કાલાનલસમપ્રભમ્ ।
અતિરૌદ્રં મહાકાયં મહાદંષ્ટ્રં મહારુતમ્ ॥ ૧૨॥

મહાસિંહં મહારૂપં દૃષ્ટ્વા સઙ્ક્ષુભિતં જગત્ ।
સર્વદેવગણૈઃ સાર્થં તત્રાગત્ય પિતામહઃ ॥ ૧૩॥

આગન્તુકૈર્ભૂતપૂર્વૈર્વર્તમાનૈરનુત્તમૈઃ ।
ગુણૈર્નામસહસ્રેણ તુષ્ટાવ શ્રુતિસમ્મતૈઃ ॥ ૧૪॥

---

॥ અથ શ્રીનૃસિંહસહસ્રનામસ્તોત્રમ્ ॥

ૐ નમઃ શ્રીમદ્દિવ્યલક્ષ્મીનૃસિંહસહસ્રનામસ્તોત્રમહામન્ત્રસ્ય
બ્રહ્મા ઋષિઃ શ્રીલક્ષ્મીનૃસિંહોદેવતા । અનુષ્ટુપ્છન્દઃ
શ્રીનૃસિંહઃપરમાત્મા બીજં લક્ષ્મીર્માયાશક્તિઃ જીવોબીજં
બુદ્ધિઃ શક્તિઃ ઉદાનવાયુઃ બીજં સરસ્વતી શક્તિઃ વ્યઞ્જનાનિ
બીજાનિ સ્વરાઃ શક્તયઃ ૐ ક્ષ્રૌં હ્રીં ઇતિ બીજાનિ ૐ શ્રીં
અં આં ઇતિ શક્તયઃ વિકીર્ણનખદંષ્ટ્રાયુધાયેતિ કીલકં
અકારાદિતિ બોધકં શ્રીલક્ષ્મીનૃસિંહપ્રસાદસિદ્ધ્યર્થે
શ્રીલક્ષ્મીનૃસિંહસહસ્રનામસ્તોત્રમન્ત્રજપે વિનિયોગઃ -

બ્રહ્મોવાચ -
અથ કરન્યાસઃ ।
ૐ શ્રીલક્ષ્મીનૃસિંહાય નમઃ । અઙ્ગુષ્ઠાભ્યાં નમઃ ।
ૐ વજ્રનખાય નમઃ । તર્જનીભ્યાં નમઃ ।
ૐ મહારુદ્રાય નમઃ । મધ્યમાભ્યાં નમઃ ।
ૐ સર્વતોમુખાય નમઃ । અનામિકાભ્યાં નમઃ ।
ૐ વિકટાસ્યાય નમઃ । કનિષ્ઠિકાભ્યાં નમઃ ।
ૐ વીરાય નમઃ । કરતલકરપૃષ્ઠાભ્યાં નમઃ ।
અથ હૃદયાદિન્યાસઃ ।
ૐ શ્રીલક્ષ્મીનૃસિંહાય હૃદયાય નમઃ ।
ૐ વજ્રનખાય શિરસે સ્વાહા ।

ૐ મહારુદ્રાય શિખાયૈ વૌષટ્ ।
ૐ સર્વતોમુખાય કવચાય હુમ્ ।
ૐ વિકટાસ્યાય નેત્રત્રયાય વૌષટ્ ।
ૐ વીરાય અસ્ત્રાય ફટ્ ।
ઇતિ ન્યાસઃ ।
અથ દિગ્બન્ધઃ ।
ૐ ઐન્દ્રીં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ આગ્નેયીં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ યામ્યાં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ નૈરૃતિં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ વારુણીં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ વાયવીં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ કૌબેરીં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ ઈશાનીં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ ઊર્ધ્વાં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ અધસ્તાદ્દિશં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।
ૐ અન્તરિક્ષાં દિશં સુદર્શનેન બધ્નામિ નમશ્ચક્રાય સ્વાહા ।

અથ ધ્યાનમ્ -
સત્યજ્ઞાનસુખસ્વરૂપમમલં ક્ષીરાબ્ધિમધ્યે સ્થિતં
યોગારૂઢમતિપ્રસન્નવદનં ભૂષાસહસ્રોજ્વલમ્ ।
ત્ર્યક્ષં ચક્રપિનાકસ્નાભયકરાન્બિભ્રાણમર્કચ્છવિં
છત્રીભૂતફણીન્દ્રમિન્દુધવલં લક્ષ્મીનૃસિંહં ભજે ॥ ૧॥

ઉપાસ્મહે નૃસિંહાખ્યં બ્રહ્મ વેદાન્તગોચરમ્ ।
ભૂયોલાલિતસંસારચ્છેદહેતું જગદ્ગુરુમ્ ॥ ૨॥

બ્રહ્મોવાચ -
ૐ હ્રીં શ્રીં ઐં ક્ષ્રૌં

બ્રહ્મોવાચ -
ૐ નમો નારસિંહાય વજ્રદંષ્ટ્રાય વજ્રિણે ।
વજ્રદેહાય વજ્રાય નમો વજ્રનખાય ચ ॥ ૧॥

વાસુદેવાય વન્દ્યાય વરદાય વરાત્મને ।

વરદાભયહસ્તાય વરાય વરરૂપિણે ॥ ૨॥

વરેણ્યાય વરિષ્ઠાય શ્રીવરાય નમો નમઃ ।
પ્રહ્લાદવરદાયૈવ પ્રત્યક્ષવરદાય ચ ॥ ૩॥

પરાત્પરપરેશાય પવિત્રાય પિનાકિને ।
પાવનાય પ્રસન્નાય પાશિને પાપહારિણે ॥ ૪॥

પુરુષ્ટુતાય પુણ્યાય પુરુહૂતાય તે નમઃ ।
તત્પુરુષાય તથ્યાય પુરાણપુરુષાય ચ ॥ ૫॥

પુરોધસે પૂર્વજાય પુષ્કરાક્ષાય તે નમઃ ।
પુષ્પહાસાય હાસાય મહાહાસાય શાર્ઙ્ગિણે ॥ ૬॥

સિંહાય સિંહરાજાય જગદ્વશ્યાય તે નમઃ ।
અટ્ટહાસાય રોષાય જલવાસાય તે નમઃ ॥ ૭॥

ભૂતાવાસાય ભાસાય શ્રીનિવાસાય ખડ્ગિને ।
ખડ્ગજિહ્વાય સિંહાય ખડ્ગવાસાય તે નમઃ ॥ ૮॥

નમો મૂલાધિવાસાય ધર્મવાસાય ધન્વિને ।
ધનઞ્જયાય ધન્યાય નમો મૃત્યુઞ્જયાય ચ ॥ ૯॥

શુભઞ્જયાય સૂત્રાય નમઃ શત્રુઞ્જયાય ચ ।
નિરઞ્જનાય નીરાય નિર્ગુણાય ગુણાય ચ ॥ ૧૦॥

નિષ્પ્રપઞ્ચાય નિર્વાણપ્રદાય નિબિડાય ચ ।
નિરાલમ્બાય નીલાય નિષ્કલાય કલાય ચ ॥ ૧૧॥

નિમેષાય નિબન્ધાય નિમેષગમનાય ચ ।
નિર્દ્વન્દ્વાય નિરાશાય નિશ્ચયાય નિરાય ચ ॥ ૧૨॥

નિર્મલાય નિબન્ધાય નિર્મોહાય નિરાકૃતે ।
નમો નિત્યાય સત્યાય સત્કર્મનિરતાય ચ ॥ ૧૩॥

સત્યધ્વજાય મુઞ્જાય મુઞ્જકેશાય કેશિને ।
હરીશાય ચ શેષાય ગુડાકેશાય વૈ નમઃ ॥ ૧૪॥

સુકેશાયોર્ધ્વકેશાય કેશિસંહારકાય ચ ।
જલેશાય સ્થલેશાય પદ્મેશાયોગ્રરૂપિણે ॥ ૧૫॥

કુશેશયાય કૂલાય કેશવાય નમો નમઃ ।
સૂક્તિકર્ણાય સૂક્તાય રક્તજિહ્વાય રાગિણે ॥ ૧૬॥

દીપ્તરૂપાય દીપ્તાય પ્રદીપ્તાય પ્રલોભિને ।
પ્રચ્છિન્નાય પ્રબોધાય પ્રભવે વિભવે નમઃ ॥ ૧૭॥

પ્રભઞ્જનાય પાન્થાય પ્રમાયાપ્રમિતાય ચ ।
પ્રકાશાય પ્રતાપાય પ્રજ્વલાયોજ્વલાય ચ ॥ ૧૮॥

જ્વાલામાલાસ્વરૂપાય જ્વલજ્જિહ્વાય જ્વાલિને ।
મહોજ્જ્વલાય કાલાય કાલમૂર્તિધરાય ચ ॥ ૧૯॥

કાલાન્તકાય કલ્પાય કલનાય કૃતે નમઃ ।
કાલચક્રાય શક્રાય વષટ્ચક્રાય ચક્રિણે ॥ ૨૦॥

અક્રૂરાય કૃતાન્તાય વિક્રમાય ક્રમાય ચ ।
કૃત્તિને કૃત્તિવાસાય કૃતઘ્નાય કૃતાત્મને ॥ ૨૧॥

સઙ્ક્રમાય ચ ક્રુદ્ધાય ક્રાન્તલોકત્રયાય ચ ।
અરૂપાય સ્વરૂપાય હરયે પરમાત્મને ॥ ૨૨॥

અજયાયાદિદેવાય અક્ષયાય ક્ષયાય ચ ।
અઘોરાય સુઘોરાય ઘોરાઘોરતરાય ચ ॥ ૨૩॥

નમોઽસ્ત્વઘોરવીર્યાય લસદ્ઘોરાય તે નમઃ ।
ઘોરાધ્યક્ષાય દક્ષાય દક્ષિણાર્યાય શમ્ભવે ॥ ૨૪॥

અમોઘાય ગુણૌઘાય અનઘાયાઘહારિણે ।
મેઘનાદાય નાદાય તુભ્યં મેઘાત્મને નમઃ ॥ ૨૫॥

મેઘવાહનરૂપાય મેઘશ્યામાય માલિને ।
વ્યાલયજ્ઞોપવીતાય વ્યાઘ્રદેહાય વૈ નમઃ ॥ ૨૬॥

વ્યાઘ્રપાદાય ચ વ્યાઘ્રકર્મિણે વ્યાપકાય ચ ।
વિકટાસ્યાય વીરાય વિષ્ટરશ્રવસે નમઃ ॥ ૨૭॥

વિકીર્ણનખદંષ્ટ્રાય નખદંષ્ટ્રાયુધાય ચ ।
વિશ્વક્સેનાય સેનાય વિહ્વલાય બલાય ચ ॥ ૨૮॥

વિરૂપાક્ષાય વીરાય વિશેષાક્ષાય સાક્ષિણે ।
વીતશોકાય વિસ્તીર્ણવદનાય નમો નમઃ ॥ ૨૯॥

વિધાનાય વિધેયાય વિજયાય જયાય ચ ।
વિબુધાય વિભાવાય નમો વિશ્વમ્ભરાય ચ ॥ ૩૦॥

વીતરાગાય વિપ્રાય વિટઙ્કનયનાય ચ ।
વિપુલાય વિનીતાય વિશ્વયોને નમો નમઃ ॥ ૩૧॥

વિડમ્બનાય વિત્તાય વિશ્રુતાય વિયોનયે ।
વિહ્વલાય વિવાદાય નમો વ્યાહૃતયે નમઃ ॥ ૩૨॥

વિલાસાય વિકલ્પાય મહાકલ્પાય તે નમઃ ।
બહુકલ્પાય કલ્પાય કલ્પાતીતાય શિલ્પિને ॥ ૩૩॥

કલ્પનાય સ્વરૂપાય ફણિતલ્પાય વૈ નમઃ ।
તડિત્પ્રભાય તાર્યાય તરુણાય તરસ્વિને ॥ ૩૪॥

તપનાય તરક્ષાય તાપત્રયહરાય ચ ।
તારકાય તમોઘ્નાય તત્ત્વાય ચ તપસ્વિને ॥ ૩૫॥

તક્ષકાય તનુત્રાય તટિને તરલાય ચ ।
શતરૂપાય શાન્તાય શતધારાય તે નમઃ ॥ ૩૬॥

શતપત્રાય તાર્ક્ષ્યાય સ્થિતયે શતમૂર્તયે ।
શતક્રતુસ્વરૂપાય શાશ્વતાય શતાત્મને ॥ ૩૭॥

નમઃ સહસ્રશિરસે સહસ્રવદનાય ચ ।
સહસ્રાક્ષાય દેવાય દિશશ્રોત્રાય તે નમઃ ॥ ૩૮॥

નમઃ સહસ્રજિહ્વાય મહાજિહ્વાય તે નમઃ ।
સહસ્રનામધેયાય સહસ્રાક્ષિધરાય ચ ॥ ૩૯॥

સહસ્રબાહવે તુભ્યં સહસ્રચરણાય ચ ।
સહસ્રાર્કપ્રકાશાય સહસ્રાયુધધારિણે ॥ ૪૦॥

નમઃ સ્થૂલાય સૂક્ષ્માય સુસૂક્ષ્માય નમો નમઃ ।
સુક્ષુણ્યાય સુભિક્ષાય સુરાધ્યક્ષાય શૌરિણે ॥ ૪૧॥

ધર્માધ્યક્ષાય ધર્માય લોકાધ્યક્ષાય વૈ નમઃ ।
પ્રજાધ્યક્ષાય શિક્ષાય વિપક્ષક્ષયમૂર્તયે ॥ ૪૨॥

કલાધ્યક્ષાય તીક્ષ્ણાય મૂલાધ્યક્ષાય તે નમઃ ।

અધોક્ષજાય મિત્રાય સુમિત્રવરુણાય ચ ॥ ૪૩॥

શત્રુઘ્નાય અવિઘ્નાય વિઘ્નકોટિહરાય ચ ।
રક્ષોઘ્નાય તમોઘ્નાય ભૂતઘ્નાય નમો નમઃ ॥ ૪૪॥

ભૂતપાલાય ભૂતાય ભૂતવાસાય ભૂતિને ।
ભૂતબેતાલઘાતાય ભૂતાધિપતયે નમઃ ॥ ૪૫॥

ભૂતગ્રહવિનાશાય ભૂતસંયમતે નમઃ ।
મહાભૂતાય ભૃગવે સર્વભૂતાત્મને નમઃ ॥ ૪૬॥

સર્વારિષ્ટવિનાશાય સર્વસમ્પત્કરાય ચ ।
સર્વાધારાય સર્વાય સર્વાર્તિહરયે નમઃ ॥ ૪૭॥

સર્વદુઃખપ્રશાન્તાય સર્વસૌભાગ્યદાયિને ।
સર્વજ્ઞાયાપ્યનન્તાય સર્વશક્તિધરાય ચ ॥ ૪૮॥

સર્વૈશ્વર્યપ્રદાત્રે ચ સર્વકાર્યવિધાયિને ।
સર્વજ્વરવિનાશાય સર્વરોગાપહારિણે ॥ ૪૯॥

સર્વાભિચારહન્ત્રે ચ સર્વૈશ્વર્યવિધાયિને ।
પિઙ્ગાક્ષાયૈકશ‍ૃઙ્ગાય દ્વિશ‍ૃઙ્ગાય મરીચયે ॥ ૫૦॥

બહુશ‍ૃઙ્ગાય લિઙ્ગાય મહાશ‍ૃઙ્ગાય તે નમઃ ।
માઙ્ગલ્યાય મનોજ્ઞાય મન્તવ્યાય મહાત્મને ॥ ૫૧॥

મહાદેવાય દેવાય માતુલિઙ્ગધરાય ચ ।
મહામાયાપ્રસૂતાય પ્રસ્તુતાય ચ માયિને ॥ ૫૨॥

અનન્તાનન્તરૂપાય માયિને જલશાયિને ।
મહોદરાય મન્દાય મદદાય મદાય ચ ॥ ૫૩॥

મધુકૈટભહન્ત્રે ચ માધવાય મુરારયે ।
મહાવીર્યાય ધૈર્યાય ચિત્રવાર્યાય તે નમઃ ॥ ૫૪॥

ચિત્રકૂર્માય ચિત્રાય નમસ્તે ચિત્રભાનવે ।
માયાતીતાય માયાય મહાવીરાય તે નમઃ ॥ ૫૫॥

મહાતેજાય બીજાય તેજોધામ્ને ચ બીજિને ।
તેજોમય નૃસિંહાય નમસ્તે ચિત્રભાનવે ॥ ૫૬॥

મહાદંષ્ટ્રાય તુષ્ટાય નમઃ પુષ્ટિકરાય ચ ।
શિપિવિષ્ટાય હૃષ્ટાય પુષ્ટાય પરમેષ્ઠિને ॥ ૫૭॥

વિશિષ્ટાય ચ શિષ્ટાય ગરિષ્ઠાયેષ્ટદાયિને ।
નમો જ્યેષ્ઠાય શ્રેષ્ઠાય તુષ્ટાયામિતતેજસે ॥ ૫૮॥

અષ્ટાઙ્ગન્યસ્તરૂપાય સર્વદુષ્ટાન્તકાય ચ ।
વૈકુણ્ઠાય વિકુણ્ઠાય કેશિકણ્ઠાય તે નમઃ ॥ ૫૯॥

કણ્ઠીરવાય લુણ્ઠાય નિઃશઠાય હઠાય ચ ।
સત્ત્વોદ્રિક્તાય રુદ્રાય ઋગ્યજુસ્સામગાય ચ ॥ ૬૦॥

ઋતુધ્વજાય વજ્રાય મન્ત્રરાજાય મન્ત્રિણે ।
ત્રિનેત્રાય ત્રિવર્ગાય ત્રિધામ્ને ચ ત્રિશૂલિને ॥ ૬૧॥

ત્રિકાલજ્ઞાનરૂપાય ત્રિદેહાય ત્રિધાત્મને ।
નમસ્ત્રિમૂર્તિવિદ્યાય ત્રિતત્ત્વજ્ઞાનિને નમઃ ॥ ૬૨॥

અક્ષોભ્યાયાનિરુદ્ધાય અપ્રમેયાય ભાનવે ।
અમૃતાય અનન્તાય અમિતાયામિતૌજસે ॥ ૬૩॥

અપમૃત્યુવિનાશાય અપસ્મારવિઘાતિને ।
અન્નદાયાન્નરૂપાય અન્નાયાન્નભુજે નમઃ ॥ ૬૪॥

નાદ્યાય નિરવદ્યાય વિદ્યાયાદ્ભુતકર્મણે ।
સદ્યોજાતાય સઙ્ઘાય વૈદ્યુતાય નમો નમઃ ॥ ૬૫॥

અધ્વાતીતાય સત્ત્વાય વાગતીતાય વાગ્મિને ।
વાગીશ્વરાય ગોપાય ગોહિતાય ગવામ્પતે ॥ ૬૬॥

ગન્ધર્વાય ગભીરાય ગર્જિતાયોર્જિતાય ચ ।
પર્જન્યાય પ્રબુદ્ધાય પ્રધાનપુરુષાય ચ ॥ ૬૭॥

પદ્માભાય સુનાભાય પદ્મનાભાય માનિને ।
પદ્મનેત્રાય પદ્માય પદ્માયાઃ પતયે નમઃ ॥ ૬૮॥

પદ્મોદરાય પૂતાય પદ્મકલ્પોદ્ભવાય ચ ।
નમો હૃત્પદ્મવાસાય ભૂપદ્મોદ્ધરણાય ચ ॥ ૬૯॥

શબ્દબ્રહ્મસ્વરૂપાય બ્રહ્મરૂપધરાય ચ ।
બ્રહ્મણે બ્રહ્મરૂપાય પદ્મનેત્રાય તે નમઃ ॥ ૭૦॥

બ્રહ્મદાય બ્રાહ્મણાય બ્રહ્મબ્રહ્માત્મને નમઃ ।
સુબ્રહ્મણ્યાય દેવાય બ્રહ્મણ્યાય ત્રિવેદિને ॥ ૭૧॥

પરબ્રહ્મસ્વરૂપાય પઞ્ચબ્રહ્માત્મને નમઃ ।
નમસ્તે બ્રહ્મશિરસે તદાઽશ્વશિરસે નમઃ ॥ ૭૨॥

અથર્વશિરસે નિત્યમશનિપ્રમિતાય ચ ।
નમસ્તે તીક્ષ્ણદંષ્ટ્રાય લોલાય લલિતાય ચ ॥ ૭૩॥

લાવણ્યાય લવિત્રાય નમસ્તે ભાસકાય ચ ।
લક્ષણજ્ઞાય લક્ષાય લક્ષણાય નમો નમઃ ॥ ૭૪॥

લસદ્દીપ્તાય લિપ્તાય વિષ્ણવે પ્રભવિષ્ણવે ।
વૃષ્ણિમૂલાય કૃષ્ણાય શ્રીમહાવિષ્ણવે નમઃ ॥ ૭૫॥

પશ્યામિ ત્વાં મહાસિંહં હારિણં વનમાલિનમ્ ।
કિરીટિનં કુણ્ડલિનં સર્વાઙ્ગં સર્વતોમુખમ્ ॥ ૭૬॥

સર્વતઃ પાણિપાદોરં સર્વતોઽક્ષિ શિરોમુખમ્ ।
સર્વેશ્વરં સદાતુષ્ટં સમર્થં સમરપ્રિયમ્ ॥ ૭૭॥

બહુયોજનવિસ્તીર્ણં બહુયોજનમાયતમ્ ।
બહુયોજનહસ્તાઙ્ઘ્રિં બહુયોજનનાસિકમ્ ॥ ૭૮॥

મહારૂપં મહાવક્ત્રં મહાદંષ્ટ્રં મહાભુજમ્ ।
મહાનાદં મહારૌદ્રં મહાકાયં મહાબલમ્ ॥ ૭૯॥

આનાભેર્બ્રહ્મણો રૂપમાગલાદ્વૈષ્ણવં તથા ।
આશીર્ષાદ્રુન્દ્રમીશાનં તદગ્રે સર્વતઃ શિવમ્ ॥ ૮૦॥

નમોઽસ્તુ નારાયણ નારસિંહ નમોઽસ્તુ નારાયણ વીરસિંહ ।
નમોઽસ્તુ નારાયણ ક્રૂરસિંહ નમોઽસ્તુ નારાયણ દિવ્યસિંહ ॥ ૮૧॥

નમોઽસ્તુ નારાયણ વ્યાઘ્રસિંહ નમોઽસ્તુ નારાયણ પુચ્છસિંહ ।
નમોઽસ્તુ નારાયણ પૂર્ણસિંહ નમોઽસ્તુ નારાયણ રૌદ્રસિંહ ॥ ૮૨॥

નમો નમો ભીષણભદ્રસિંહ નમો નમો વિહ્વલનેત્રસિંહ ।
નમો નમો બૃંહિતભૂતસિંહ નમો નમો નિર્મલચિત્રસિંહ ॥ ૮૩॥

નમો નમો નિર્જિતકાલસિંહ નમો નમઃ કલ્પિતકલ્પસિંહ ।

નમો નમો કામદકામસિંહ નમો નમસ્તે ભુવનૈકસિંહ ॥ ૮૪॥

દ્યાવાપૃથિવ્યોરિદમન્તરં હિ વ્યાપ્તં ત્વયૈકેન દિશશ્ચ સર્વાઃ ।
દૃષ્ટ્વાદ્ભુતં રૂપમુગ્રં તવેદં લોકત્રયં પ્રવ્યથિતં મહાત્મન્ ॥ ૮૫॥

અમી હિત્વા સુરસઙ્ઘા વિશન્તિ કેચિદ્ભીતાઃ પ્રાઞ્જલયો ગૃણન્તિ ।
સ્વસ્તીત્યુક્ત્વા મુનયઃ સિદ્ધસઙ્ઘાઃ સ્તુવન્તિ ત્વાં સ્તુતિભિઃ પુષ્કલાભિઃ ॥ ૮૬॥

રુદ્રાદિત્યાવસવો યે ચ સાધ્યા વિશ્વેદેવા મરુતશ્ચોષ્મપાશ્ચ ।
ગન્ધર્વયક્ષાસુરસિદ્ધસઙ્ઘા વીક્ષન્તિ ત્વાં વિસ્મિતાશ્ચૈવ સર્વે ॥ ૮૭॥

લેલિહ્યસે ગ્રસમાનઃ સમન્તાલ્લોકાન્સમગ્રાન્વદનૈર્જ્વલદ્ભિઃ ।
તેજોભિરાપૂર્ય જગત્સમગ્રં ભાસસ્તવોગ્રાઃ પ્રતપન્તિ વિષ્ણો ॥ ૮૮॥

ભવિષ્ણુસ્ત્વં સહિષ્ણુસ્ત્વં ભ્રજિષ્ણુર્જિષ્ણુરેવ ચ ।
પૃથિવીમન્તરીક્ષં ત્વં પર્વતારણ્યમેવ ચ ॥ ૮૯॥

કલાકાષ્ઠા વિલિપ્તસ્ત્વં મુહૂર્તપ્રહરાદિકમ્ ।
અહોરાત્રં ત્રિસન્ધ્યા ચ પક્ષમાસર્તુવત્સરાઃ ॥ ૯૦॥

યુગાદિર્યુગભેદસ્ત્વં સંયુગો યુગસન્ધયઃ ।
નિત્યં નૈમિત્તિકં દૈનં મહાપ્રલયમેવ ચ ॥ ૯૧॥

કરણં કારણં કર્તા ભર્તા હર્તા ત્વમીશ્વરઃ ।
સત્કર્તા સત્કૃતિર્ગોપ્તા સચ્ચિદાનન્દવિગ્રહઃ ॥ ૯૨॥

પ્રાણસ્ત્વં પ્રાણિનાં પ્રત્યગાત્મા ત્વં સર્વદેહિનામ્ ।
સુજ્યોતિસ્ત્વં પરઞ્જ્યોતિરાત્મજ્યોતિઃ સનાતનઃ ॥ ૯૩॥

જ્યોતિર્લોકસ્વરૂપસ્ત્વં ત્વં જ્યોતિર્જ્યોતિષાં પતિઃ ।
સ્વાહાકારઃ સ્વધાકારો વષટ્કારઃ કૃપાકરઃ ॥ ૯૪॥

હન્તકારો નિરાકારો વેગકારશ્ચ શઙ્કરઃ ।
અકારાદિહકારાન્ત ઓઙ્કારો લોકકારકઃ ॥ ૯૫॥

એકાત્મા ત્વમનેકાત્મા ચતુરાત્મા ચતુર્ભુજઃ ।
ચતુર્મૂર્તિશ્ચતુર્દંષ્ટ્રશ્ચતુર્વેદમયોત્તમઃ ॥ ૯૬॥

લોકપ્રિયો લોકગુરુર્લોકેશો લોકનાયકઃ ।
લોકસાક્ષી લોકપતિર્લોકાત્મા લોકલોચનઃ ॥ ૯૭॥

લોકાધારો બૃહલ્લોકો લોકાલોકમયો વિભુઃ ।
લોકકર્તા વિશ્વકર્તા કૃતાવર્તઃ કૃતાગમઃ ॥ ૯૮॥

અનાદિસ્ત્વમનન્તસ્ત્વમભૂતોભૂતવિગ્રહઃ ।
સ્તુતિઃ સ્તુત્યઃ સ્તવપ્રીતઃ સ્તોતા નેતા નિયામકઃ ॥ ૯૯॥

ત્વં ગતિસ્ત્વં મતિર્મહ્યં પિતા માતા ગુરુઃ સખા ।
સુહૃદશ્ચાત્મરૂપસ્ત્વં ત્વાં વિના નાસ્તિ મે ગતિઃ ॥ ૧૦૦॥

નમસ્તે મન્ત્રરૂપાય અસ્ત્રરૂપાય તે નમઃ ।
બહુરૂપાય રૂપાય પઞ્ચરૂપધરાય ચ ॥ ૧૦૧॥

ભદ્રરૂપાય રૂઢાય યોગરૂપાય યોગિને ।
સમરૂપાય યોગાય યોગપીઠસ્થિતાય ચ ॥ ૧૦૨॥

યોગગમ્યાય સૌમ્યાય ધ્યાનગમ્યાય ધ્યાયિને ।
ધ્યેયગમ્યાય ધામ્ને ચ ધામાધિપતયે નમઃ ॥ ૧૦૩॥

ધરાધરાય ધર્માય ધારણાભિરતાય ચ ।
નમો ધાત્રે ચ સન્ધાત્રે વિધાત્રે ચ ધરાય ચ ॥ ૧૦૪॥

દામોદરાય દાન્તાય દાનવાન્તકરાય ચ ।
નમઃ સંસારવૈદ્યાય ભેષજાય નમો નમઃ ॥ ૧૦૫॥

સીરધ્વજાય શીતાય વાતાયાપ્રમિતાય ચ ।
સારસ્વતાય સંસારનાશનાયાક્ષ માલિને ॥ ૧૦૬॥

અસિધર્મધરાયૈવ ષટ્કર્મનિરતાય ચ ।
વિકર્માય સુકર્માય પરકર્મવિધાયિને ॥ ૧૦૭॥

સુશર્મણે મન્મથાય નમો વર્માય વર્મિણે ।
કરિચર્મવસાનાય કરાલવદનાય ચ ॥ ૧૦૮॥

કવયે પદ્મગર્ભાય ભૂતગર્ભઘૃણાનિધે ।
બ્રહ્મગર્ભાય ગર્ભાય બૃહદ્ગર્ભાય ધૂર્જટે ॥ ૧૦૯॥

નમસ્તે વિશ્વગર્ભાય શ્રીગર્ભાય જિતારયે ।
નમો હિરણ્યગર્ભાય હિરણ્યકવચાય ચ ॥ ૧૧૦॥

હિરણ્યવર્ણદેહાય હિરણ્યાક્ષવિનાશિને ।
હિરણ્યકશિપોર્હન્ત્રે હિરણ્યનયનાય ચ ॥ ૧૧૧॥

હિરણ્યરેતસે તુભ્યં હિરણ્યવદનાય ચ ।
નમો હિરણ્યશ‍ૃઙ્ગાય નિઃશ‍ૃઙ્ગાય શ‍ૃઙ્ગિણે ॥ ૧૧૨॥

ભૈરવાય સુકેશાય ભીષણાયાન્ત્રિમાલિને ।
ચણ્ડાય રુણ્ડમાલાય નમો દણ્ડધરાય ચ ॥ ૧૧૩॥

અખણ્ડતત્ત્વરૂપાય કમણ્ડલુધરાય ચ ।
નમસ્તે ખણ્ડસિંહાય સત્યસિંહાય તે નમઃ ॥ ૧૧૪॥

નમસ્તે શ્વેતસિંહાય પીતસિંહાય તે નમઃ ।
નીલસિંહાય નીલાય રક્તસિંહાય તે નમઃ ॥ ૧૧૫॥

નમો હારિદ્રસિંહાય ધૂમ્રસિંહાય તે નમઃ ।
મૂલસિંહાય મૂલાય બૃહત્સિંહાય તે નમઃ ॥ ૧૧૬॥

પાતાલસ્થિતસિંહાય નમઃ પર્વતવાસિને ।
નમો જલસ્થસિંહાય અન્તરિક્ષસ્થિતાય ચ ॥ ૧૧૭॥

કાલાગ્નિરુદ્રસિંહાય ચણ્ડસિંહાય તે નમઃ ।
અનન્તસિંહસિંહાય અનન્તગતયે નમઃ ॥ ૧૧૮॥

નમો વિચિત્રસિંહાય બહુસિંહસ્વરૂપિણે ।
અભયઙ્કરસિંહાય નરસિંહાય તે નમઃ ॥ ૧૧૯॥

નમોઽસ્તુ સિંહરાજાય નારસિંહાય તે નમઃ ।
સપ્તાબ્ધિમેખલાયૈવ સત્યસત્યસ્વરૂપિણે ॥ ૧૨૦॥

સપ્તલોકાન્તરસ્થાય સપ્તસ્વરમયાય ચ ।
સપ્તાર્ચીરૂપદંષ્ટ્રાય સપ્તાશ્વરથરૂપિણે ॥ ૧૨૧॥

સપ્તવાયુસ્વરૂપાય સપ્તચ્છન્દોમયાય ચ ।
સ્વચ્છાય સ્વચ્છરૂપાય સ્વચ્છન્દાય ચ તે નમઃ ॥ ૧૨૨॥

શ્રીવત્સાય સુવેધાય શ્રુતયે શ્રુતિમૂર્તયે ।
શુચિશ્રવાય શૂરાય સુપ્રભાય સુધન્વિને ॥ ૧૨૩॥

શુભ્રાય સુરનાથાય સુપ્રભાય શુભાય ચ ।
સુદર્શનાય સૂક્ષ્માય નિરુક્તાય નમો નમઃ ॥ ૧૨૪॥

સુપ્રભાય સ્વભાવાય ભવાય વિભવાય ચ ।

સુશાખાય વિશાખાય સુમુખાય મુખાય ચ ॥ ૧૨૫॥

સુનખાય સુદંષ્ટ્રાય સુરથાય સુધાય ચ ।
સાઙ્ખ્યાય સુરમુખ્યાય પ્રખ્યાતાય પ્રભાય ચ ॥ ૧૨૬॥

નમઃ ખટ્વાઙ્ગહસ્તાય ખેટમુદ્ગરપાણયે ।
ખગેન્દ્રાય મૃગેન્દ્રાય નાગેન્દ્રાય દૃઢાય ચ ॥ ૧૨૭॥

નાગકેયૂરહારાય નાગેન્દ્રાયાઘમર્દિને ।
નદીવાસાય નગ્નાય નાનારૂપધરાય ચ ॥ ૧૨૮॥

નાગેશ્વરાય નાગાય નમિતાય નરાય ચ ।
નાગાન્તકરથાયૈવ નરનારાયણાય ચ ॥ ૧૨૯॥

નમો મત્સ્યસ્વરૂપાય કચ્છપાય નમો નમઃ ।
નમો યજ્ઞવરાહાય નરસિંહાય નમો નમઃ ॥ ૧૩૦॥

વિક્રમાક્રાન્તલોકાય વામનાય મહૌજસે ।
નમો ભાર્ગવરામાય રાવણાન્તકરાય ચ ॥ ૧૩૧॥

નમસ્તે બલરામાય કંસપ્રધ્વંસકારિણે ।
બુદ્ધાય બુદ્ધરૂપાય તીક્ષ્ણરૂપાય કલ્કિને ॥ ૧૩૨॥

આત્રેયાયાગ્નિનેત્રાય કપિલાય દ્વિજાય ચ ।
ક્ષેત્રાય પશુપાલાય પશુવક્ત્રાય તે નમઃ ॥ ૧૩૩॥

ગૃહસ્થાય વનસ્થાય યતયે બ્રહ્મચારિણે ।
સ્વર્ગાપવર્ગદાત્રે ચ તદ્ભોક્ત્રે ચ મુમુક્ષવે ॥ ૧૩૪॥

શાલગ્રામનિવાસાય ક્ષીરાબ્ધિશયનાય ચ ।
શ્રીશૈલાદ્રિનિવાસાય શિલાવાસાય તે નમઃ ॥ ૧૩૫॥

યોગિહૃત્પદ્મવાસાય મહાહાસાય તે નમઃ ।
ગુહાવાસાય ગુહ્યાય ગુપ્તાય ગુરવે નમઃ ॥ ૧૩૬॥

નમો મૂલાધિવાસાય નીલવસ્ત્રધરાય ચ ।
પીતવસ્ત્રાય શસ્ત્રાય રક્તવસ્ત્રધરાય ચ ॥ ૧૩૭॥

રક્તમાલાવિભૂષાય રક્તગન્ધાનુલેપિને ।
ધુરન્ધરાય ધૂર્તાય દુર્ધરાય ધરાય ચ ॥ ૧૩૮॥

દુર્મદાય દુરન્તાય દુર્ધરાય નમો નમઃ ।
દુર્નિરીક્ષ્યાય નિષ્ઠાય દુર્દર્શાય દ્રુમાય ચ ॥ ૧૩૯॥

દુર્ભેદાય દુરાશાય દુર્લભાય નમો નમઃ ।
દૃપ્તાય દૃપ્તવક્ત્રાય અદૃપ્તનયનાય ચ ॥ ૧૪૦॥

ઉન્મત્તાય પ્રમત્તાય નમો દૈત્યારયે નમઃ ।
રસજ્ઞાય રસેશાય અરક્તરસનાય ચ ॥ ૧૪૧॥

પથ્યાય પરિતોષાય રથ્યાય રસિકાય ચ ।
ઊર્ધ્વકેશોર્ધ્વરૂપાય નમસ્તે ચોર્ધ્વરેતસે ॥ ૧૪૨॥

ઊર્ધ્વસિંહાય સિંહાય નમસ્તે ચોર્ધ્વબાહવે ।
પરપ્રધ્વંસકાયૈવ શઙ્ખચક્રધરાય ચ ॥ ૧૪૩॥

ગદાપદ્મધરાયૈવ પઞ્ચબાણધરાય ચ ।
કામેશ્વરાય કામાય કામપાલાય કામિને ॥ ૧૪૪॥

નમઃ કામવિહારાય કામરૂપધરાય ચ ।
સોમસૂર્યાગ્નિનેત્રાય સોમપાય નમો નમઃ ॥ ૧૪૫॥

નમઃ સોમાય વામાય વામદેવાય તે નમઃ ।
સામસ્વનાય સૌમ્યાય ભક્તિગમ્યાય વૈ નમઃ ॥ ૧૪૬॥

કૂષ્માણ્ડગણનાથાય સર્વશ્રેયસ્કરાય ચ ।
ભીષ્માય ભીષદાયૈવ ભીમવિક્રમણાય ચ ॥ ૧૪૭॥

મૃગગ્રીવાય જીવાય જિતાયાજિતકારિણે ।
જટિને જામદગ્ન્યાય નમસ્તે જાતવેદસે ॥ ૧૪૮॥

જપાકુસુમવર્ણાય જપ્યાય જપિતાય ચ ।
જરાયુજાયાણ્ડજાય સ્વેદજાયોદ્ભિજાય ચ ॥ ૧૪૯॥

જનાર્દનાય રામાય જાહ્નવીજનકાય ચ ।
જરાજન્માદિદૂરાય પ્રદ્યુમ્નાય પ્રમોદિને ॥ ૧૫૦॥

જિહ્વારૌદ્રાય રુદ્રાય વીરભદ્રાય તે નમઃ ।
ચિદ્રૂપાય સમુદ્રાય કદ્રુદ્રાય પ્રચેતસે ॥ ૧૫૧॥

ઇન્દ્રિયાયેન્દ્રિયજ્ઞાય નમોઽસ્ત્વિન્દ્રાનુજાય ચ ।
અતીન્દ્રિયાય સારાય ઇન્દિરાપતયે નમઃ ॥ ૧૫૨॥

ઈશાનાય ચ ઈડ્યાય ઈશિતાય ઇનાય ચ ।
વ્યોમાત્મને ચ વ્યોમ્ને ચ નમસ્તે વ્યોમકેશિને ॥ ૧૫૩ ॥

વ્યોમાધારાય ચ વ્યોમવક્ત્રાયાસુરઘાતિને ।
નમસ્તે વ્યોમદંષ્ટ્રાય વ્યોમવાસાય તે નમઃ ॥ ૧૫૪ ॥

સુકુમારાય રામાય શિશુચારાય તે નમઃ ।
વિશ્વાય વિશ્વરૂપાય નમો વિશ્વાત્મકાય ચ ॥ ૧૫૫ ॥

જ્ઞાનાત્મકાય જ્ઞાનાય વિશ્વેશાય પરાત્મને ।
એકાત્મને નમસ્તુભ્યં નમસ્તે દ્વાદશાત્મને ॥ ૧૫૬ ॥

ચતુર્વિંશતિરૂપાય પઞ્ચવિંશતિમૂર્તયે ।
ષડ્વિંશકાત્મને નિત્યં સપ્તવિંશતિકાત્મને ॥ ૧૫૭ ॥

ધર્માર્થકામમોક્ષાય વિરક્તાય નમો નમઃ ।
ભાવશુદ્ધાય સિદ્ધાય સાધ્યાય શરભાય ચ ॥ ૧૫૮ ॥

પ્રબોધાય સુબોધાય નમો બુધિપ્રિયાય ચ ।
સ્નિગ્ધાય ચ વિદગ્ધાય મુગ્ધાય મુનયે નમઃ ॥ ૧૫૯ ॥

પ્રિયંવદાય શ્રવ્યાય સ્રુક્સ્રુવાય શ્રિતાય ચ ।
ગૃહેશાય મહેશાય બ્રહ્મેશાય નમો નમઃ ॥ ૧૬૦ ॥

શ્રીધરાય સુતીર્થાય હયગ્રીવાય તે નમઃ ।
ઉગ્રાય ઉગ્રવેગાય ઉગ્રકર્મરતાય ચ ॥ ૧૬૧ ॥

ઉગ્રનેત્રાય વ્યગ્રાય સમગ્રગુણશાલિને ।
બાલગ્રહવિનાશાય પિશાચગ્રહઘાતિને ॥ ૧૬૨ ॥

દુષ્ટગ્રહનિહન્ત્રે ચ નિગ્રહાનુગ્રહાય ચ ।
વૃષધ્વજાય વૃષ્ણ્યાય વૃષાય વૃષભાય ચ ॥ ૧૬૩ ॥

ઉગ્રશ્રવાય શાન્તાય નમઃ શ્રુતિધરાય ચ ।
નમસ્તે દેવદેવેશ નમસ્તે મધુસૂદન ॥ ૧૬૪ ॥

નમસ્તે પુણ્ડરીકાક્ષ નમસ્તે દુરિતક્ષય ।
નમસ્તે કરુણાસિન્ધો નમસ્તે સમિતિઞ્જય ॥ ૧૬૫ ॥

નમસ્તે નરસિંહાય નમસ્તે ગરુડધ્વજ ।

યજ્ઞનેત્ર નમસ્તેઽસ્તુ કાલધ્વજ જયધ્વજ ॥ ૧૬૬॥

અગ્નિનેત્ર નમસ્તેઽસ્તુ નમસ્તે હ્યમરપ્રિય ।
મહાનેત્ર નમસ્તેઽસ્તુ નમસ્તે ભક્તવત્સલ ॥ ૧૬૭॥

ધર્મનેત્ર નમસ્તેઽસ્તુ નમસ્તે કરુણાકર ।
પુણ્યનેત્ર નમસ્તેઽસ્તુ નમસ્તેઽભીષ્ટદાયક ॥ ૧૬૮॥

નમો નમસ્તે દયાસિંહરૂપ નમો નમસ્તે નરસિંહરૂપ ।
નમો નમસ્તે રણસિંહરૂપ નમો નમસ્તે નરસિંહરૂપ ॥ ૧૬૯॥

---

ઉદ્ધૃત્ય ગર્વિતં દૈત્યં નિહત્યાજૌ સુરદ્વિષમ્ ।
દેવકાર્યં મહત્કૃત્વા ગર્જસે સ્વાત્મતેજસા ॥ ૧૭૦॥

અતિરુદ્રમિદં રૂપં દુસ્સહં દુરતિક્રમમ્ ।
દૃષ્ટ્વા તુ શઙ્કિતાઃ સર્વાદેવતાસ્ત્વામુપાગતાઃ ॥ ૧૭૧॥

એતાન્પશ્ય મહેશાનં બ્રહ્માણં માં શચીપતિમ્ ।
દિક્પાલાન્ દ્વાદશાદિત્યાન્ રુદ્રાનુરગરાક્ષસાન્ ॥ ૧૭૨॥

સર્વાન્ ઋષિગણાન્સપ્તમાતૃગૌરીં સરસ્વતીમ્ ।
લક્ષ્મીં નદીશ્ચ તીર્થાનિ રતિં ભૂતગાણાન્યપિ ॥ ૧૭૩॥

પ્રસીદ ત્વં મહાસિંહ ઉગ્રભાવમિમં ત્યજ ।
પ્રકૃતિસ્થો ભવ ત્વં હિ શાન્તિભાવં ચ ધારય ॥ ૧૭૪॥

ઇત્યુક્ત્વા દણ્ડવદ્ભૂમૌ પપાત સ પિતામહઃ ।
પ્રસીદ ત્વં પ્રસીદ ત્વં પ્રસીદેતિ પુનઃ પુનઃ ॥ ૧૭૫॥

માર્કણ્ડેય ઉવાચ-
દૃષ્ટ્વા તુ દેવતાઃ સર્વાઃ શ્રુત્વા તાં બ્રહ્મણો ગિરમ્ ।
સ્તોત્રેણાપિ ચ સંહૃષ્ટઃ સૌમ્યભાવમધારયત્ ॥ ૧૭૬॥

અબ્રવીન્નારસિંહસ્તુ વીક્ષ્ય સર્વાન્સુરોત્તમાન્ ।
સંત્રસ્તાન્ ભયસંવિગ્નાન્ શરણં સમુપાગતાન્ ॥ ૧૭૭॥

શ્રીનૃસિંહ ઉવાચ-
ભો ભો દેવવરાઃ સર્વે પિતામહપુરોગમાઃ ।
શ ૃણુધ્વં મમ વાક્યં ચ ભવંતુ વિગતજ્વરાઃ ॥ ૧૭૮॥

યદ્ધિતં ભવતાં નૂનં તત્કરિષ્યામિ સાંપ્રતમ્ ।
એવં નામસહસ્રં મે ત્રિસન્ધ્યં યઃ પઠેત્ શુચિઃ ॥ ૧૭૯॥

શ‌ૃણોતિ વા શ્રાવયતિ પૂજાં તે ભક્તિસંયુતઃ ।
સર્વાન્કામાનવાપ્નોતિ જીવેચ્ચ શરદાં શતમ્ ॥ ૧૮૦॥

યો નામભિર્નૃસિંહાદ્યૈરર્ચયેત્ક્રમશો મમ ।
સર્વતીર્થેષુ યત્પુણ્યં સર્વતીર્થેષુ યત્ફલમ્ ॥ ૧૮૧॥

સર્વ પૂજાસુ યત્પ્રોક્તં તત્સર્વં લભતે ભૃશમ્ ।
જાતિસ્મરત્વં લભતે બ્રહ્મજ્ઞાનં સનાતનમ્ ॥ ૧૮૨॥

સર્વપાપવિનિર્મુક્તઃ તદ્વિષ્ણોઃ પરમં પદમ્ ।
મન્નામકવચં બધ્વા વિચરેદ્વિગતજ્વરઃ ॥ ૧૮૩॥

ભૂતભેતાલકૂષ્માણ્ડ પિશાચબ્રહ્મરાક્ષસાઃ ।
શાકિનીડાકિનીજ્યેષ્ઠા નીલી બાલગ્રહાદિકાઃ ॥ ૧૮૪॥

દુષ્ટગ્રહાશ્ચ નશ્યન્તિ યક્ષરાક્ષસપન્નગાઃ ।
યે ચ સન્ધ્યાગ્રહાઃ સર્વે ચાણ્ડાલગ્રહસંજ્ઞિકાઃ ॥ ૧૮૫॥

નિશાચરગ્રહાઃ સર્વે પ્રણશ્યન્તિ ચ દૂરતઃ ।
કુક્ષિરોગં ચ હૃદ્રોગં શૂલાપસ્મારમેવ ચ ॥ ૧૮૬॥

ઐકાહિકં દ્વ્યાહિકં ચાતુર્થિકમધજ્વરમ્ ।
આધયે વ્યાધયઃ સર્વે રોગા રોગાધિદેવતાઃ ॥ ૧૮૭॥

શીઘ્રં નશ્યન્તિ તે સર્વે નૃસિંહસ્મરણાત્સુરાઃ ।
રાજાનો દાસતાં યાન્તિ શત્રવો યાન્તિ મિત્રતામ્ ॥ ૧૮૮॥

જલાનિ સ્થલતાં યાન્તિ વહ્નયો યાન્તિ શીતતામ્ ।
વિષાણ્યપ્યમૃતા યાન્તિ નૃસિંહસ્મરણાત્સુરાઃ ॥ ૧૮૯॥

રાજ્યકામો લભેદ્રાજ્યં ધનકામો લભેદ્ધનમ્ ।
વિદ્યાકામો લભેદ્વિદ્યાં બદ્ધો મુચ્યેત બન્ધનાત્ ॥ ૧૯૦॥

વ્યાલવ્યાઘ્રભયં નાસ્તિ ચોરસર્પાદિકં તથા ।
અનુકૂલા ભવેદ્ભાર્યા લોકૈશ્ચ પ્રતિપૂજ્યતે ॥ ૧૯૧॥

સુપુત્રં ધનધાન્યં ચ ભવન્તિ વિગતજ્વરાઃ ।
એતત્સર્વં સમાપ્નોતિ નૃસિંહસ્ય પ્રસાદતઃ ॥ ૧૯૨॥

જલસન્તરણે ચૈવ પર્વતારણ્યમેવ ચ ।
વનેઽપિ વિચિરન્મર્ત્યો દુર્ગમે વિષમે પથિ ॥ ૧૯૩॥

કલિપ્રવેશને ચાપિ નારસિંહં ન વિસ્મરેત્ ।
બ્રહ્મઘ્નશ્ચ પશુઘ્નશ્ચ ભ્રૂણહા ગુરુતલ્પગઃ ॥ ૧૯૪॥

મુચ્યતે સર્વપાપેભ્યઃ કૃતઘ્ન સ્ત્રીવિઘાતકઃ ।
વેદાનાં દૂષકશ્ચાપિ માતાપિતૃ વિનિન્દકઃ ॥ ૧૯૫॥

અસત્યસ્તુ તેથા યજ્ઞ નિન્દકો લોકનિન્દકઃ ।
સ્મૃત્વા સકૃન્નૃસિંહ તુ મુચ્યતે સર્વકિલ્બષૈઃ ॥ ૧૯૬॥

બહુનાત્ર કિમુક્તેન સ્મૃત્વા માં શુદ્ધમાનસઃ ।
યત્ર યત્ર ચરેન્મર્ત્યો નૃસિંહસ્તત્ર રક્ષતિ ॥ ૧૯૭॥

ગચ્છન્ તિષ્ઠન્ શ્વપન્ભુઞ્જન્ જાગ્રન્નપિ હસન્નપિ ।
નૃસિંહેતિ નૃસિંહેતિ નૃસિંહેતિ સદા સ્મરન્ ॥ ૧૯૮॥

પુમાન્નલિપ્યતે પાપૈર્ભુક્તિં મુક્તિં ચ વિન્દતિ ।
નારી સુભગતામેતિ સૌભાગ્યં ચ સ્વરૂપતામ્ ॥ ૧૯૯॥

ભર્તુઃ પ્રિયત્વં લભતે ન વૈધવ્યં ચ વિન્દતિ ।
ન સપત્નીં ચ જન્માન્તે સમ્યક્ જ્ઞાની ભવેદ્વિજઃ ॥ ૨૦૦॥

ભૂમિપ્રદક્ષિણાન્મર્ત્યો યત્ફલં લભતે ચિરાત્ ।
તત્ફલં લભતે નારસિંહમૂર્તિપ્રદક્ષિણાત્ ॥ ૨૦૧॥

માર્કણ્ડેય ઉવાચ -
ઇત્યુક્ત્વા દેવદેવેશો લક્ષ્મીમાલિઙ્ગ્ય લીલયા ।
પ્રહ્લાદસ્યાભિષેકં તુ બ્રહ્મણે ચોપદિષ્ટવાન્ ॥ ૨૦૨॥

શ્રીશૈલસ્ય પ્રદાસે તુ લોકાનાં ચ હિતાય વૈ ।
સ્વરૂપં સ્થાપયામાસ પ્રકૃતિસ્થોઽભવત્તદા ॥ ૨૦૩॥

બ્રહ્માપિ દૈત્યરાજાનં પ્રહ્લાદમભ્યષેચયત્ ।
દૈવતૈઃ સહ સુપ્રીતો હ્યાત્મલોલં યયૌ સ્વયમ્ ॥ ૨૦૪॥

હિરણ્યકશિપોર્ભીત્યા પ્રપલાય શચીપતિઃ ।
સ્વર્ગરાજ્યપરિભ્રષ્ટો યુગાનામેકવિંશતિઃ ॥ ૨૦૫॥

નૃસિંહેન હતે દૈત્યે સ્વર્ગલોકમવાપ સઃ ।
દિક્પાલશ્ચ સુસંપ્રાપ્તઃ સ્વસ્વસ્થાનમનુત્તમમ્ ॥ ૨૦૬॥

ધર્મે મતિઃ સમસ્તાનાં પ્રજાનામભવત્તદા ।
એવં નામસહસ્રં મે બ્રહ્મણા નિર્મિતં પુરા ॥ ૨૦૭॥

પુત્રાનધ્યાપયામાસ સનકાદીન્મહામતિઃ ।
ઊચુસ્તે ચ તતઃ સર્વલોકાનાં હિતકામ્યયા ॥ ૨૦૮॥

દેવતા ઋષયઃ સિદ્ધા યક્ષવિદ્યાધરોરગાઃ ।
ગન્ધર્વાશ્ચ મનુષ્યાશ્ચ ઇહામુત્રફલૈષિણઃ ॥ ૨૦૯॥

યસ્ય સ્તોત્રસ્ય પાઠાદ્ધિ વિશુદ્ધમનસોઽભવન્ ।
સનત્કુમારઃ સમ્પ્રાપ્તૌ ભારદ્વાજા મહામતિઃ ॥ ૨૧૦॥

તસ્માદાઙ્ગિરસઃ પ્રાપ્તસ્તસ્માત્પ્રાપ્તો મહાક્રતુઃ ।
જગ્રાહ ભાર્ગવસ્તસ્માત્ અગ્નિમિત્રાય સોઽબ્રવીત્ ॥ ૨૧૧॥

જૈગીષવ્યાય સપ્રાહ સોઽબ્રવીચ્છ્યવનાય ચ ।
તસ્માદુવાચ શાણ્ડિલ્યો ગર્ગાય પ્રાહ વૈ મુનિઃ ॥ ૨૧૨॥

ક્રતુઞ્જયાય સ પ્રાહ જતુકર્ણ્યાય સંયમી ।
વિષ્ણુવૃદ્ધાય સોઽપ્યાહ સોઽપિ બોધાયનાય ચ ॥ ૨૧૩॥

ક્રમાત્સ વિષ્ણવે પ્રાહ સ પ્રાહોદ્ધામકુક્ષયે ।
સિંહ તેજાશ્ચ તસ્માચ્ચ શ્રીપ્રિયાય દદૌ ચ નઃ ॥ ૨૧૪॥

ઉપદિષ્ટોઽસ્મિ તેનાહમિદં નામસહસ્રકમ્ ।
તત્પ્રસાદાદમૃત્યુર્મે યસ્માત્કસ્માદ્ભયં ન હિ ॥ ૨૧૫॥

મયા ચ કથિતં નારસિંહસ્તોત્રમિદં તવ ।
ત્વં હિ નિત્યં શુચિર્ભૂત્વા તમારાધય શાશ્વતમ્ ॥ ૨૧૬॥

સર્વભૂતાશ્રયં દેવં નૃસિંહં ભક્તવત્સલમ્ ।
પૂજયિત્વા સ્તવં જપ્ત્વા હુત્વા નિશ્ચલમાનસઃ ॥ ૨૧૭॥

પ્રાપ્યસે મહતીં સિદ્ધિં સર્વાન્કામાન્વરોત્તમાન્ ।
અયમેવ પરોધર્મસ્ત્વિદમેવ પરં તપઃ ॥ ૨૧૮॥

ઇદમેવ પરં જ્ઞાનમિદમેવ મહદ્વ્રતમ્ ।
અયમેવ સદાચારસ્ત્વયમેવ સદા મખઃ ॥ ૨૧૯॥

ઇદમેવ ત્રયો વેદાઃ સચ્છાસ્ત્રાણ્યાગમાનિ ચ ।
નૃસિંહમન્ત્રાદન્યચ્ચ વૈદિકં તુ ન વિદ્યતે ॥ ૨૨૦॥

યદિહાસ્તિ તદન્યત્ર યન્નેહાસ્તિ ન તત્ક્વચિત્ ।
કથિતં તે નૃસિંહસ્ય ચરિતં પાપનાશનમ્ ॥ ૨૨૧॥

સર્વમન્ત્રમયં તાપત્રયોપશમનં પરમ્ ।
સર્વાર્થસાધનં દિવ્યં કિં ભૂયઃ શ્રોતુમિચ્છસિ ॥ ૨૨૨॥

તપ્તહાટકકેશાન્તં જ્વલત્પાવકલોચનમ્ ।
વજ્રાધિકનખસ્પર્શં દિવ્યસિંહં નમોઽસ્તુ તે ॥ ૨૨૩॥

શ્રીકારપૂર્વો નૃસિંહો દુર્જય દ્વિર્મધ્યસ્તથા ।
ત્રિસપ્તકૃત્વા જપતો મહાભયનિવારણમ્ ॥ ૨૨૪॥

શ્રીનૃસિંહો દિવ્યસિંહઃ સર્વારિષ્ટાર્તિદુઃખહ ।
એકવીરોઽદ્ભુતબલો યન્ત્રમન્ત્રકભઞ્જનઃ ॥૨૨૫॥

માતા નૃસિંહશ્ચ પિતા નૃસિંહો
ભ્રાતા નૃસિંહશ્ચ સખા નૃસિંહઃ ।
વિદ્યા નૃસિંહો દ્રવિણં નૃસિંહઃ
સ્વામી નૃસિંહઃ સકલં નૃસિંહઃ ॥ ૨૨૬॥

અતો નૃસિંહઃ પરતો નૃસિંહો
યતો યતો યામિ તતો નૃસિંહઃ ।
નૃસિંહદેવાન્ન પરં ન કિઞ્ચિત્
તસ્માન્નૃસિંહં શરણ્યં પ્રપદ્યે ॥ ૨૨૭॥

સંસારસાગરસમુદ્ધરણૈકમન્ત્રં
બ્રહ્માદિદેવસુરપૂજિતસિદ્ધમન્ત્રમ્ ।
દારિદ્ર્યદુઃખભયશોકવિનાશમન્ત્રં
વન્દે મહાભયહરં શ્રીનૃસિન્હમન્ત્રમ્ ॥ ૨૨૮॥

ઇતિ શ્રીનૃસિંહપુરાણે નૃસિંહપ્રકૃતિભાવે માર્કણ્ડેયોપદિષ્ટં
સર્વાર્થસાધનાભિધં શ્રીમદ્દિવ્યલક્ષ્મીનૃસિંહસહસ્રનામસ્તોત્રં સમ્પૂર્ણમ્ ।
શ્રીલક્ષ્મીનૃસિંહાર્પણમસ્તુ ।
॥ શુભં ભવતુ ॥

Corrected and proofread by Sunder Hattangadi

---

*nRisiMhasahasranAmastotram*

pdf was typeset on February 5, 2025

Please send corrections to *sanskrit@cheerful.com*